E-Text

पत्रस्य नाम : लघुशब्देन्दुशेखरः (सन्धिपञ्चकम्)

पत्रसंख्या : V

पाठ्यांशनाम : उञः ऊँ इत्यारभ्य अणोऽप्रगृह्यस्यानुनासिकः इति यावत्

पाठ्यांशसंख्या : 15

पाठ्यांशस्य मुख्याः अंशाः :

1) उञः ऊँ।
2) मय उञो वो वा।
3) ईदूतौ च सप्तम्यर्थे।
4) अणोऽप्रगृह्यस्यानुनासिकः।

विषयसूची


1.0 : उञः ऊँ

1.1 : शाकल्यग्रहणमनुवर्तते वा

2.0 : ऊँ

3.0 : मय उञो वो वा

4.0 : अणोऽप्रगृह्यस्यानुनासिकः

4.1 : अर्थग्रहणप्रयोजनम्


Pathshala पाठशाला A Gateway to all Post Graduate Courses

1.0 उञः ऊँ

**शेखरे - अत्र उञ् निपात एव।**

उञ् इति प्रत्याहारो वा वेञ्धातोः क्विबन्तरूपं वा निपातो वा इति संशयः। न प्रत्याहारः, यदि प्रत्याहारः तर्हि उच् इत्येव वदेत् , हकारादीनां प्रगृग्यसंज्ञायां फलाभावात्। न वेञः क्विबन्तं, लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव इति न्यायात्। किन्तु निपातपदानुवृत्त्या प्रतिपदोक्तः उकाररूपो निपात एवायम्। ञकार इत्।

**1.1 शाकल्यग्रहणमनुवर्तते वा**

**शेखरे - उञ ऊँ इत्येकसूत्रत्वे तु शाकल्यग्रहणाननुवृत्तौ (ऊँ इति) इत्येकमेव स्यात्, प्रगृह्यसंज्ञाप्रकरणेन प्रगृह्यत्वस्य आदेशस्य च सह विधानात्। उ इति विति इति च न स्यात् - इत्यादि।**

उञः ऊँ इत्येकं सूत्रं योगविभागेन 1. उञः, 2. ऊँ - इति योगद्वयं कृतं भाष्ये। अन्यथा एकसूत्रत्वे शाकल्यग्रहणानुवृत्तौ वा अननुवृत्तौ वा इष्टं न सिध्येत्। तथाहि - 1. यदि शाकल्यग्रहणं नानुवर्तते तर्हि - उञः प्रगृह्यसंज्ञा स्यात्, तस्य स्थाने ऊँ इत्यादेशश्च स्यात् - इति सूत्रार्थः। तदा उ + इति = ऊँ इति इत्येकविधमेव रूपं सिध्येत्, (उ इति), (विति) इति रूपद्वयं न सिध्येत्। अत्र स्थानिनः उञः विहिता संज्ञा स्थानिवद्भावेन आदेशे सिध्यति।

ननु किमर्थं स्थानिवद्भावः, प्रगृह्यमिति ऊँइत्यादेशे विशेषणमस्तु, तथा च उञः स्थाने प्रगृह्यसंज्ञाविशिष्टः ऊँ इत्यादेशः स्यादिति सूत्रार्थः - इति चेत्। विधेयस्य उद्देश्येन सम्बन्धः प्रथमोपस्थितः, न तु विधेये विधेयान्तरस्य विशेषणत्वेनान्वयो युक्तः। प्रकृते उञः इति उद्देश्यम्। प्रगृह्यसंज्ञा, ऊँआदेशश्च विधेयौ।

2. शाकल्यग्रहणानुवृत्तौ च प्रगृह्यसंज्ञा/ऊँआदेशः अनयोरन्यतरः स्यादित्यर्थे विकल्पेन ऊँआदेशे तस्य स्थानिवद्भावेन प्रगृह्यसंज्ञया (ऊँ इति) रूपं सिध्यति, तदभावे च विति

इति रूपद्वयमेव स्यात्। (उ इति) इति तृतीयं रूपं न सिध्येत्। तस्मात् रूपत्रयसिद्धये योगविभाग आश्रयणीय एव।

**उञः इत्येको योगः** - उञः इति षष्ठ्यन्तानुरोधेन प्रगृह्यपदमनुवृत्तं संज्ञापरम्। सम्बुद्धौ शाकल्यस्येतावनार्षे इति सूत्रात् शाकल्यस्य इतौ अनार्षे इत्यनुवर्तते। तथाच - उञः इतौ परे तस्य प्रगृह्यमिति वाचकं पदं वा स्यात् - इति सूत्रार्थः। निपात एकाजनाङ् इत्यनेन नित्यं प्रगृह्यसंज्ञायां प्राप्तायां विकल्पार्थमिदं सूत्रम्। तथा च प्राप्तविभाषेयम्।

**शेखरे - विकल्पाननुवृत्तौ हि निपात एकेत्येव सिद्धे इदं व्यर्थमेव स्यात्।**

योगविभागे कृते उञः इति सूत्रम्। तस्य च - उञ् वा प्रगृह्यं स्यात् इतिशब्दे परे इति फलितोऽर्थः। उ इति विति -इति रूपद्वयं फलति। यद्यत्र शाकल्यग्रहणानुवृत्तिः न स्वीक्रियेत तर्हि निपात एकाजनाङित्यनेनैव प्रगृह्यसंज्ञायां सिद्धायाम् उ इति इति रूपे सिद्धे उञः इति योगो व्यर्थः स्यात्। तस्मात् प्राप्तविभाषेयम्।

2.0 ऊँ

**ऊँ इति द्वितीयो योगः**

**शेखरे - ऊँ इत्यत्र शाकल्यप्रगृह्यपदयोरसम्बन्धे उञ इत्यर्थादिकारादप्रगृह्यस्यैवादेशे तस्य इको यण् इति यणि ऊ इति इत्यस्यासिद्धिः।** दीर्घोच्चारणवैयर्थत्यापत्तिश्च इत्यादि उञः प्रगृह्यम् शाकल्यस्य इतौ इत्यनुवर्तते। तथा च - उञः इतिशब्दे परे प्रगृह्यसंज्ञः ऊँ इत्यादेशो वा स्यात् - इति सूत्रार्थः। दीर्घः अनुनासिकः उवर्णः। अत्र यदि शाकल्यप्रगृह्यपदयोः अनुवृत्तिः न स्यात् तर्हि को दोषः इति चेत्। उञः इत्यनुवर्तते। यद्यपि पूर्वसूत्रे तस्य प्रगृह्यसंज्ञा विहिता तथापि उद्देश्यत्वेन उपात्तः उञः इति अप्रगृह्यः शब्द एवानुवर्तते। पूर्वसूत्रे यः यादृशः उच्चारितः, स तादृश

एवानुवर्तते। अर्थाधिकारो नाम स एव। शब्दाधिकारो नाम आनुपूर्वीमात्रस्योपस्थितिः। तथा च प्रकृते अप्रगृह्यस्य उञः स्थाने ऊँ इत्यादेशः स्यादित्यर्थे उ इति ऊँ इति इति स्थिते इको यणचीति यणादेशे विति इत्येव रूपं स्यात्। यदि च तदेव रूपमिष्टं तर्हि उञः इति पूर्वेणैव तत् सिद्धमिति इदं व्यर्थम्। शाकल्यपदमनुवर्तते, प्रगृह्यपदं नानुवर्तते इति स्वीकारेऽपि उञः ऊँ इत्यादेशे कृते यणादेशे दोषः तदवस्थः।

प्रगृह्यपदमनुवर्तते शाकल्यपदं तु नानुवर्तते इति स्वीकारे तु पूर्वसूत्रेण उञः विकल्पेन प्रगृह्यसंज्ञायाम् उ इति इति प्रकृतिभावसहितमेकं रूपं, प्रगृह्यसंज्ञाभावे च अनेन (उञः स्थाने प्रगृह्यसंज्ञः ऊँ इत्यादेशो नित्यं स्याद्) इत्यर्थकेन ऊँ इति सूत्रेण ऊँ इति इत्यन्यच्च रूपमिति रूपद्वयमेव सिध्येत्। विति इति यणादेशसहितं रूपं न सिध्येत्। तस्मादुभयोरनुवृत्तिरावश्यकी।

**शेखरे - अत्र विशिष्टस्य विधिरिति न वाक्यभेदः।**

उञः स्थाने ऊँ इत्यादेशः स्यात्, स च प्रगृह्यं स्यात् - इत्येवं वाक्यभेदेन न सूत्रार्थो वर्ण्यते। किन्तु उञः स्थाने प्रगृह्यसंज्ञः ऊँआदेशः स्यात् इत्येकमेव वाक्यमित्यर्थः।

**शेखरे - नच प्रगृह्यत्वमादेशश्च शाकल्यमते इति तयोरेकप्रयोगे एव प्रवृत्तिः स्यादिति वाच्यम्। योगविभागसामर्थ्येन शाकल्यमते एव भावाभावकल्पनात्।**

**अत्र आक्षेपः** - यदि शाकल्यमते उञः प्रगृह्यसंज्ञा, शाकल्यमते एव उञः ऊँ इत्यादेशोऽपि तर्हि प्रगृह्यसंज्ञा ऊँ आदेशश्च शाकल्यस्य इत्यर्थ आयाति। तथा च तयोः सन्नियोगशिष्टत्वे इव प्रगृह्यसंज्ञायां सत्याम् ऊँआदेशः सर्वदा स्यात्, ऊँआदेशाभावे च निपात एकाजित्यनेन प्रगृह्यसंज्ञा नित्यं स्यादिति कृत्वा ऊँ इति, उ इति इति रूपद्वयमेव स्यात्। विति इति रूपं न स्यात् - इति।

**समाधानम्** - यदि रूपद्वयमेव स्यात् तर्हि योगविभागो व्यर्थः। उञ ऊँ इत्येकेनैव योगेन रूपद्वयसिद्धेः। तस्माद् योगविभागसामर्थ्यात् शाकल्यमते एव प्रगृह्यसंज्ञाया अभावः, प्रगृह्यसंज्ञाविशिष्ट ऊँआदेशश्च। ऊँआदेशरहिता प्रगृह्यसंज्ञा च निपात एकाजित्यनेनेति रूपत्रयं सिध्यति।

**शेखरे - वस्तुतः उञनुवादेन संज्ञादेशयोः सहविधानमेव न्याय्यम्।**

उञः इति प्रथमयोगेन शाकल्यमते प्रगृह्यसंज्ञायाः अभाव उच्यते। ऊँ इति द्वितीययोगेन किं क्रियते। उञः प्रगृह्यसंज्ञा ऊँआदेशश्च स्यात् - इति प्रगृह्यसंज्ञा-आदेशयोः सह विधानं क्रियते। उञः प्रगृह्यसंज्ञा स्याच्चेत् तस्य ऊँआदेशोऽपि स्यादिति यावत्। स च ऊँआदेशः स्थानिवद्भावेन प्रगृह्यसंज्ञः। तथा च - 1. निपात एकाजिति सूत्रेण पाणिनिमते उञः प्रगृह्यसंज्ञा, 2. शाकल्यमते प्रगृह्यसंज्ञाया अभावः, 3. शाकल्यमते प्रगृह्यसंज्ञा, ऊँआदेशश्च - इति त्रैविध्यम्। उञनुवादेन = प्रगृह्यसंज्ञायाः ऊँआदेशस्य च उद्देश्यः उञेव। न तु (उञमनूद्य ऊँआदेशः, ऊँआदेशमनूद्य प्रगृह्यसंज्ञा) - इत्येवम्।

A Gateway to all Post Graduate Courses

**3.0 मय उञो वो वा**

**शेखरे - व्याख्यानादत्र मय् प्रत्याहारः।**

मय् इति वर्णसमाम्नायस्थः प्रत्याहारः, बहुलक्ष्यसंस्कारमूलकात् व्याख्यानात्। नतु (मयधातोः मकारयकारयोः पर्यायेण वकारादेशःस्याद्) इत्यर्थसम्भवानुरोधेन (मय - गतौ) इति भ्वादिगणीयो धातुः। तथासति त्रिपाद्यां पाठोऽप्यनावश्यकः।

ङमो ह्रस्वादचि ङमुण्नित्यम् इति सूत्रात् अचीत्यनुवर्तते। एवञ्च - मयः परस्य उञ् इति निपातस्य स्थाने वकारादेशो वा स्यात् अचि परे - इति सूत्रार्थः। शेखरे- अस्य त्रैपादिकत्वेनासिद्धत्वात् न प्लुतप्रगृह्या इत्यनेन बाधः।

किम् उ उक्तम् इति स्थिते विकल्पेन वकारादेशे (किम्वुक्तम्) इति, तदभावे प्रगृह्यसंज्ञायां प्रकृतिभावेन (किमु उक्तम्) इति च रूपद्वयमिष्यते।

**तत्र प्रश्नः** - यथा मनर् रथः इत्यादौ रोरीति रेफलोपे, हशिचेत्युत्वे च प्राप्ते परोपि रेफलोपः त्रिपादीस्थत्वादसिद्धः इति कृत्वा उत्वं प्रवर्तते तथा प्रकृते किम् उ उक्तम् इति स्थिते प्लुतप्रगृह्या अचि नित्यम् इति प्रकृतिभावे वकारादेशे च प्राप्ते असिद्धो वकारादेशः कथं स्यात् - इति।

**समाधानम्** - मनर् रथ इत्यत्र रेफलोपेपि तस्यासिद्धत्वात् तत्स्थाने उत्वं प्रवर्तत एव। तथा प्रकृते वकारादेशे कृतेऽपि तस्यासिद्धत्वात् प्रकृतिभावः प्रवर्तताम्, तावता वकारस्य नास्त्यपायः। वकारादेशस्य वैकल्पिकत्वात् रूपद्वयं च सिध्यत्येव। तथा च फलतः प्रकृतिभावेन वकारादेशबाधो नास्ति।

**शेखरे - नानुस्वारः इति। किं वितीत्यादौ प्रगृह्यसंज्ञाभावेस्यासिद्धत्वात् इको यणिति यणि अनुस्वारो भवत्येव।**

किम् उ उक्तम् इति स्थिते अनेन सूत्रेण वकारादेशे किम् व् उक्तमिति जाते मोऽनुस्वारः (मान्तस्य पदस्य हलिपरे अनुस्वारः स्यात्) - इति सूत्रेण किमो मकारस्यानुस्वारः प्राप्नोति। परन्तु वकारादेशसूत्रस्य त्रैपादिकत्वेनासिद्धत्वात् नानुस्वारः। (किम् उ इति) इत्यादौ तु उञः इति सूत्रेण प्रगृह्यत्वविकल्पनात् प्रगृह्यसंज्ञाया अभावे यणादेशे (किम् विति) इति जाते यणादेशस्य असिद्धत्वाभावात् मोऽनुस्वार इति सूत्रेण अनुस्वारः स्यादेव (किं विति) इति।

### 4.0 ईदूतौ च सप्तम्यर्थे

**शेखरे - ननु यः शिष्यते स लुप्यमानार्थाभिधायी इति न्यायेन गौरीशब्दस्य सप्तम्यर्थवृत्तित्वे अपि ईकारस्य तत्त्वाभावः, अत आह - ईदूदन्तमिति। शब्दस्वरूपस्य विशेष्यत्वात् तदन्तविधिरिति भावः।**

यदि (सप्तम्यर्थे वर्तमानयोः ईदूतोः प्रगृह्यसंज्ञा स्यात्) इति यथाश्रुतार्थः सूत्रस्य उच्येत तर्हि सोमो गौरी अधिश्रितः इत्यादौ गौरीशब्दावयव-ईकारादेः सप्तम्यर्थवृत्तित्वाभावात् प्रगृह्यसंज्ञा न सिध्येत्। तस्मात् सामान्येन शब्दस्वरूपं विशेष्यमध्याह्रियते। ईदूतौ इति तद्विशेषणम्। विशेषणत्वात् येन विधिस्तदन्तस्येति तदन्तविधिः। तथा च - (सप्तम्यर्थे विद्यमानम् ईदन्तमूदन्तं शब्दस्वरूपं प्रगृह्यसंज्ञं स्याद्) इति सूत्रार्थः।

**शेखरे - मामकी तनू इति। प्रगृह्येषु इतिशब्दप्रयोगस्य पदकारैः नियमितत्वात् पदपाठे प्रगृह्यत्वफलमत्र बोध्यम्।**

प्रगृह्यसंज्ञायाः प्रकृतिभावः फलम्। तर्हि (मामकी तनू) इत्युदाहरणे ईदूदन्तयोः मामकी, तनू - इत्यनयोः प्रगृह्यसंज्ञायां फलं नास्ति, अच्परकत्वाभावात् तयोः प्रकृतिभावे तदभावे वा विशेषो नास्ति। परन्तु - यद्यपि मन्त्राणां संहितापाठे प्रगृह्यत्वस्य हल्परकत्वे प्रयोजनं नास्ति तथापि मन्त्राणां पदपाठे प्रयोजनमस्ति। तथाहि- प्रगृह्यसंज्ञात् परतः इतिशब्दः प्रयोक्तव्य इति पदपाठसम्प्रदायः। तत्र इतिशब्दे परे अच्परकत्वे सति प्रकृतिभावार्थं प्रगृह्यसंज्ञा।

**शेखरे - ईदूतौ किम्। अग्ना भवाति। सप्तम्या डादेशः। तपरत्वमसन्देहाय। सप्तमीति किम्। धीती मती। ह्रस्वन्ताभ्यां तृतीयैकवचनस्य पूर्वसवर्णे सवर्णदीर्घः।**

अग्ना भवाति इत्यादिस्थले अग्ना इति अग्निशब्दात् ङिप्रत्यये सुपां सुलुक्पूर्वसवर्ण... इत्यदिना डा इत्यादेशे टिलोपे रूपम्। तत्र सप्तम्यर्थे विद्यमानत्वेऽपि ईदूदन्तत्वाभावात् प्रगृह्यत्वाभावे पदपाठे इतिकरणं नास्ति। ईदूतौ इत्यत्र तपरकरणं किमर्थमिति चेत् असन्देहार्थम्, अनण्त्वादेव भिन्नकालनिवृत्तेः सिद्धिः। अभेदका गुणा इति सिद्धान्ताच्च तत्कालानामपि ग्रहणं सिध्यति। धीती मती इत्यादौ ईदन्तत्वेऽपि

सप्तम्यर्थवृत्तित्वाभावात् प्रगृह्यसंज्ञा नास्ति, पदपाठे इतिकरणमपि नास्ति। अत्र हि धीति टा मति टा इति स्थिते सुपां सुलुक्पूर्वसवर्ण..इति सूत्रेण टास्थाने पूर्वसवर्णादेशः। धीति इ, मति इ। सवर्णदीर्घे धीती मती।

## 4.1 अर्थग्रहणप्रयोजनम्

**शेखरे - अर्थग्रहणं किमिति।**

नच ....वाच्यम् - इत्यादि किमर्थं सूत्रे अर्थग्रहणम् इति प्रश्नस्य –

1. यदि (ईदूतौ सप्तमी) इति सूत्रं स्यात्, तर्हि ईदूदेद् द्विवचनं प्रगृह्यमित्यत्रेव ईदन्ता ऊदन्ता च सप्तमी प्रगृह्यं स्यादिति तदर्थे सति, ययी पपी इत्यादावेव प्रगृह्यसंज्ञा स्यात्। तथाहि - याधातोः पाधातोश्च (यापोःकिद् द्वे च) इत्युणादिसूत्रेण ईप्रत्यये ययीः पपीः इति। ततः सप्तम्यां ययी इ पपी इ इति स्थिते सवर्णदीर्घे ययी पपी इत्यत्र परादिवद्भावेन सप्तम्याः ईकारान्तत्वम्। सोमो गौरी अधिश्रित इत्यादौ गौरी इत्यादेः ङेः लुप्तत्वात् ईकारान्तसप्तम्या अभावात् प्रगृह्यत्वं न सिध्येत्। अतः गौरी इत्यादावपि सिध्यर्थम् अर्थग्रहणम् - इति एकमुत्तरम्।

परन्तु इदमुत्तरं न सम्यक्। तथाहि - 1. (ईदूतौ सप्तमी प्रगृह्यम्, अदसः, एच्च द्विवचनम्) - इत्येवं लघुभूतन्यासकरणेन सिद्धे तथा अकृत्वा (ईदूदेद् द्विवचनं प्रगृह्यम्, अदसो मात्, ईदूतौ च सप्तम्यर्थे ) इति गुरुभूतन्यासकरणात् स्पष्टं ज्ञायते यत्, (ईदूदेद् द्विवचनं प्रगृह्यम्, अदसो मात्) इत्येतत्प्रकरणापेक्षया (ईदूतौ च सप्तम्यर्थे)इत्यस्य वैजात्यमस्तीति। किञ्च ययी पपी इति ईदन्तस्योदाहरणे सम्भवत्यपि ऊदन्तोदाहरणस्यासम्भवः।

तस्मात् (संज्ञाविधौ प्रत्ययग्रहणे न तदन्तग्रहणम्) इति तदन्तग्रहणनिषेधो नात्र प्रवर्तत इति स्वीकार्यम्। तथा च (ईदूतौ सप्तमी) इति सूत्रकरणेपि (ईदन्तम्

ऊदन्तम् यत् सप्तम्यन्तम् तत् प्रगृह्यं स्याद्) इत्यर्थो वक्तुं शक्यत एव। तदा सोमो गौरी अधिश्रितः इत्यादिस्थलेऽपि प्रगृह्यसंज्ञा सिध्यत्येव।

एवञ्च अर्थग्रहणं किमर्थमिति प्रश्नः तदवस्थः। तस्योत्तरम्- कौमुद्याम्- वृत्तावर्थान्तरोपसङ्क्रान्ते मा भूत् - वाप्यामश्वो वाप्यश्वः।

अस्य शेखरे व्याख्यावृत्ताविति। अर्थग्रहणसामर्थ्यात् सप्तम्यर्थमात्रे पर्यवसन्नम् इत्यर्थेन अत्र तत्संसृष्टाधेयार्थेपि वृत्तेर्न दोषः।

सूत्रे अर्थग्रहणाभावेऽपि यथा सोमो गौरी इत्यादौ प्रगृह्यसंज्ञा सिध्येत् तथा (ईदूदन्तं सप्तम्यन्तं प्रगृह्यम्) इति सूत्रार्थो वक्तुं शक्यत इति प्रतिपादितं प्राक्। तथा च अर्थग्रहणं व्यस्तप्रयोगेषु प्रगृह्यत्वार्थं नावश्यकम्। तर्हि किमर्थमर्थग्रहणमिति चेत् समासवृत्तौ स्वार्थं परित्यज्य वा उपसर्जनीकृत्य वा यदा सप्तम्यन्तं पूर्वपदम् अर्थान्तरोपसङ्क्रान्तं भवति (अर्थान्तरे वर्तते) तदा तत्र प्रगृह्यसंज्ञावारणार्थम् अर्थग्रहणम्। वाप्यश्व इत्यादिस्थले पूर्वपदस्य न केवलं वापीरूपे अधिकरणे वृत्तिः, किन्तु वापीरूपे अधिकरणे अश्वरूपे आधेये च वृत्तिः। तथा च अर्थान्तरोपसङ्क्रान्तं पूर्वपदं सप्तम्यन्तम्। वापी ङि अश्व सु इति स्थिते सुब्लुकि वापी अश्व इति जाते वापीशब्दः प्रत्ययलक्षणेन सप्तम्यन्तं, तच्च यद्यपि सप्तम्यर्थे वर्तते तथापि सप्तम्यर्थमात्रे न वर्तते, किन्तु समुदायार्थेऽपि वर्तते। तथा च इह प्रगृह्यसंज्ञा नास्ति।

**शेखरे - संज्ञायामिति समासे जहत्स्वार्थायां वृत्तौ पूर्वपदस्यानर्थक्येऽपि, सुप्सुपेति समासे अजहत्स्वार्थायां प्रसक्तदोषस्य उक्तरीत्यैव वारणम् - इति भावः।**

वाप्यश्वः इत्यत्र संज्ञायाम् इति सूत्रेण वा सुप्सुपा इति वा समासः। यदि संज्ञायाम् इति समासः तर्हि वाप्यश्व इत्यानुपूर्वी जन्तुविशेषस्य संज्ञा। तत्र अवयवार्थाभावात् जहत्स्वार्था वृत्तिः। यदि सुप्सुपासमासस्तर्हि अवयवार्थसत्वात्

सप्तम्यर्थवृत्तित्वात् प्राप्तायाः प्रगृह्यसंज्ञाया वारणार्थम् अर्थग्रहणेन सप्तम्यर्थमात्रे पर्यवसन्नमिति व्याख्यानमाश्रयणीयम्।

**शेखरे - गौरी अधिश्रित इत्यत्र अधिश्रयणक्रियायामेव गौरीपदबोध्याधिकरणत्वान्वय इति गौर्यधिकरणके लक्षणायां मानाभाव इति न तत्र दोषः।**

**अत्र आक्षेपः** - गौरी अधिश्रित इत्यादौ गौरी इत्यादेः लक्षणया गौर्यधिकरणक इत्यर्थः। तस्य च अधिश्रितपदार्थे अधिश्रयणकर्तरि अभेदेनान्वयः। तथा च गौरी अधिश्रित इत्यादावपि सप्तम्यर्थाधिकरणमात्रे पर्यवसन्नत्वं नास्ति, किन्तु आधेयेऽपि उपसङ्क्रान्तोऽर्थः, तथा च अर्थग्रहणेऽपि कथमीदृशस्थले प्रगृह्यसंज्ञा - इति। अत्र समाधानम् - अत्र लक्षणा नास्ति। तथाहि - गौरी ङि इति स्थिते सुपां सुलुक्...इति सूत्रेण ङेः लुकि सप्तम्यभावेऽपि यः शिष्यते स लुप्यमानार्थाभिधायी इति न्यायेन सप्तम्यर्थवृत्तित्वं गौरी इत्यस्यास्ति। गौरीपदबोध्यः सप्तम्यर्थो यद् अधिकरणत्वं तस्य च अधिश्रितपदार्थे अधिश्रयणक्रियायां भेदेनान्वयः।

**शेखरे - ननु संज्ञायामिति समासे वाक्येन संज्ञानवगमात् नित्यसमासत्वेन विग्रहोऽनुचित इति चेन्न।...इत्यादि।**

वापी ङि अश्व सु इति स्थिते संज्ञायाम् इति सूत्रेण समासश्चेत् वाप्याम् अश्वः इति विग्रहवाक्यं कथम् इति शङ्का। संज्ञायां समाससमानार्थकवाक्याभावात् नित्यसमाससदृशत्वमस्तु, परन्तु मुख्यं नित्यसमासत्वं तत्र नास्ति। मुख्ये नित्यसमासे वृत्तिघटकपदानां पृथक् प्रयोगो नास्ति, नित्यसमाससदृशे तु पृथक् प्रयोगो भवति, परन्तु संज्ञानवगमः - इति तयोः भेदः।

5.0 अणोऽप्रगृह्यस्यानुनासिकः

अणः किम् - कर्तृ हर्तृ। अत्र अण् पूर्वेणैव, व्याख्यानात्। अप्रगृह्यस्य अणः अवसाने परे अनुनासिको वा स्यात् - इति सूत्रार्थः। अत्र अण् प्रत्याहारः पूर्वेण णकारेण। परेण णकारेण प्रत्याहारश्चेत् अप्रगृह्यस्यानुनासिक इत्येव ब्रूयात्। अप्रगृह्यस्येति पर्युदासेन प्रगृह्यभिन्नस्य प्रगृह्यसदृशस्य ग्रहणे हलां प्रगृह्यसादृस्याभावादेव व्यावृत्तिः सिध्यति। तत्र अण्ग्रहणं क्रियमाणं पूर्वेण णकारेण प्रत्याहाराश्रयणात् अचां मध्ये ऋकारादीनां व्यावृत्त्यर्थमेव भवेत्। यथा - कर्तृ हर्तृ।

**शेखरे - आगच्छतमग्नी इत्यादौ प्लुतस्यासिद्धत्वात् ततः प्रागेव यथोद्देशत्वात् प्रगृह्यत्वे जाते पश्चात् प्लुते तस्याप्यनुनासिकप्रतिबन्धार्थं पुनः संज्ञेति नानुनासिकः।**

ईदूदेद् द्विवचनं प्रगृह्यमिति सूत्रेण दीर्घस्य विहिता प्रगृह्यसंज्ञा आगच्छतमग्नी३ इत्यत्र प्लुते अभावात् अणोऽप्रगृह्यस्यानुनासिक इत्यनुनासिकः प्राप्नोति। स कथं वार्यत इति प्रश्नः। आगच्छतमग्नी इत्यत्र दूराद्धूते च इति सूत्रेण प्लुतः, ईदूदेद् द्विवचनं प्रगृह्यमिति सूत्रेण प्रगृह्यसंज्ञा च युगपत् प्राप्नुतः। प्लुतस्य त्रैपादिकत्वेनासिद्धत्वात् प्रथमं प्रगृह्यसंज्ञा। पश्चात् प्लुतः। प्लुते कृते प्रगृह्यत्वाभावात् अनुनासिकः प्राप्नोति। तत्र जातस्य प्लुतस्यासिद्धत्वम् आश्रित्य पुनः प्रगृह्यसंज्ञा क्रियते। एवमनुनासिको वारणीयः। एतच्च यथोद्देशं संज्ञापरिभाषमिति पक्षे उच्यते। कार्यकालपक्षे हि अणोऽप्रगृह्यस्यानुनासिक इत्यत्र उपस्थितस्य प्रगृह्यसंज्ञाविधायक-वाक्यस्य प्लुतसूत्रदृष्ट्या असिद्धत्वं नास्ति। अत एवास्मिन् विषये कार्यकालपक्षो नाश्रीयते।

**शेखरे - संज्ञायाः कार्यार्थत्वात् पुनः प्रवृत्तौ कार्यमेव बीजम्। स्थानिवत्त्वं तु न, प्लुतस्थान्यल्वृत्तिधर्मत्वेन अल्विधित्वात्।**

आगच्छतमग्नी इत्यत्र दीर्घस्य प्रथमं प्रगृह्यसंज्ञा प्रवर्तते, ततः प्रगृह्यसंज्ञाविशिष्टस्य तस्य स्थाने प्लुतः आदेशः। तत्र स्थानिवदादेश इति सूत्रेण प्लुतस्य प्रगृह्यसंज्ञा सिध्यति। तथा च पुनः संज्ञा इति स्वीकारो व्यर्थः, अयुक्तश्च इत्याक्षेपः। समाधानम् - अत्र स्थानिवद्भाव आश्रयितुं न शक्यते। कुतः। प्लुतस्य स्थानी ईकारः तद्वृत्तिधर्मः प्रगृह्यत्वम्, तदाश्रयं कार्यम् अप्रगृह्यस्येति अनुनासिकनिषेधः। तत्र अनल्विधाविति स्थानिवद्भावनिषेधः।

**शेखरे - पूर्वसवर्णे कृते द्विवचनत्वं तु परादिवद्भावेन। तेन ताद्रूप्यानतिदेशेऽपि एतद्धर्मातिदेशाङ्गीकारात्।**

अग्नि औ इति स्थिते प्रथमयोः पूर्वसवर्णः इति सूत्रेण इकार-औकारयोः स्थाने पूर्वसवर्णदीर्घे अग्नी। इदानीम् एकादेशस्य ईकारस्य परादिवद्भावेन द्विवचनत्वम्। अत्राक्षेपः - अन्तादिवच्च इत्यनेन ताद्रूप्यं न अतिदिश्यते, तदुक्तं - न वा अताद्रूप्यातिदेशात् इति। अताद्रूप्यातिदेशादित्यस्य च अन्तादिवर्णमात्रवृत्तिधर्मानति-देशादित्यर्थः। प्रकृते औकारवृत्तिधर्मः द्विवचनत्वस्य कथमतिदेशः - इति।

**समाधानम्** - द्विवचनस्य प्रकृते औकारवृत्तित्वेऽपि न तत् वर्णमात्रवृत्तिः धर्मः। ह्रस्वत्वादयो हि वर्णमात्रवृत्तिधर्माः। प्रत्ययत्वसुप्त्वद्विवचनत्वादीनां क्वचित् वर्णवृत्तित्वसम्भवेऽपि न ते वर्णमात्रवृत्तिधर्माः। अत एव राम औ इत्यत्र वृद्धिरेचीति वृद्धौ रामौ इति जाते परादिवद्भावेन औकारस्य सुप्त्वात् पदत्वमिति भाष्ये समर्थितम्।